

# ॥ श्रीकेशवादित्य अष्टोत्तर शत नाम स्तोत्रं - स्कन्द पुराणम् ॥

## Sri Keshavaditya Ashtottaram - Skanda Puranam

The following is a rare **Ashtottaram** (108 Names) on **Lord Surya** by **Lord Vishnu** titled **Keshavaditya Ashtottara Shata Nama Stotram** from **Skanda Puranam**, **Avanti Khanda** and **Chapter 44** (titled **Keshavaditya Mahatmyam**). The brief **Phalashruti** mentions that one who recites this hymn sees auspicousnes in all his deeds and fruits such as wealth, grains, comforts, progeny, radiance, divine consciousness, knowledge and emancipation.

सनत्कुमार उवाच -

नारायणोऽपि संस्थाप्य शङ्ख प्रध्माय यत्नतः ।
तुष्टाव प्रयतो भूत्वा स्तोत्रेणाऽनेन भास्करम् ॥ १ ॥

## ॥ श्रीकेशवादित्य अष्टोत्तरम् ॥

आदित्यं भास्करं भानुं रविं सूर्यं दिवाकरम् ।
प्रभाकरं दिवानाथं तपनं तपतां-वरम् ॥ २ ॥

वरेण्यं वरदं विष्णुं अनघं वासवानुजम् ।
बलं वीर्यं सहस्रांशुं सहस्र-किरण-द्युतिम् ॥ ३ ॥

मयूख-मालिनं विश्वं मार्ताण्डं चण्ड-रोचिषम् ।
सदागतिं सुभास्वन्तं सप्त-सप्तिं सुखोदयम् ॥ ४ ॥

देवदेवं अहिर्बुध्न्यं धाम्नां-निधिं अनुत्तमम् ।
तपो-ब्रह्म-मयालोकं लोकपालं अपांपतिम् ॥ ५ ॥

जगत्-प्रबोधकं देवं जगद्-दीपं जगत्-प्रभुम् ।
अर्कं निःश्रेयसपरं कारणं श्रेयसां परम् ॥ ६ ॥

इनं प्रभाविनं पुण्यं पतङ्गं पतगेश्वरम् ।
दातारं-वाञ्छितार्थानां दृष्टाऽदृष्ट-फल-प्रदम् ॥ ७ ॥

ग्रहं ग्रहकरं हंसं हरिदश्वं हुताशनम् ।
मङ्गल्यं मङ्गलं मेध्यं ध्रुवं धर्म-प्रबोधनम् ॥ ८ ॥

भव-संभावितं भावं भूत-भव्य-भवात्मकम् ।
दुर्गमं दुर्गति-हरं हर-नेत्रं त्रयीमयम् ॥ ९ ॥

त्रैलोक्य-तिलकं तीर्थं तरणिं सर्वतोमुखम् ।
तेजोराशिं सुनिर्वाणं विश्वेशं धाम-शाश्वतम् ॥ १० ॥

कल्पं कल्पानलं कालं काल-चक्रं क्रतु-प्रियम् ।
भूषणं मरुतं सूर्यं मणिरत्नं सुलोचनम् ॥ ११ ॥

त्वष्टारं विष्टरं विश्वं सदसत्-कर्म-साक्षिणम् ।
सवितारं सहस्राक्षं प्रजा-पालं अधोक्षजम् ॥ १२ ॥

ब्रह्माणं वासरारम्भं रक्त-वर्णं महाद्युतिम् ।
सूक्तं मध्य-दिने-रुद्रं श्यामं-विष्णुं-दिन-क्षये ॥ १३ ॥

## ॥ फलश्रुतिः ॥

नाम्नां अष्ट-शतं दिव्यं विष्णुना समुदाहृतम् ।
य इदं प्रयतो भूत्वा पठेद् भक्त्या समाहितः ॥ १४ ॥

न तस्य विपदः क्वापि सर्वत्राऽपि शुभागतिः ।
धन-धान्य-सुखावाप्तिः पुत्र-लाभश्च जायते ॥ १५ ॥

तेजः प्रज्ञा परं ज्ञानं बुद्धिश्च परमागतिः ।
एवं श्रुत्वा जगन्नाथो जगामा ऽदर्शनं ततः ॥ १६ ॥

केशवाऽर्क-मुखं दृष्ट्वा पद्मराग समप्रभम् ।
विमुक्तः सर्व-पापेभ्यः सूर्य-लोके महीयते ॥ १७ ॥

दशाश्वमेध मध्ये तु रेणु-तीर्थं प्रचक्ष्यते ।
तद् दृष्ट्वा सर्व पापेभ्यो मुच्यते नात्र संशयः ॥ १८ ॥

केशवाऽर्क समीपे तु रेणु-तीर्थं प्रकीर्त्तितम् ॥ १९ ॥

---

**॥ इति श्रीस्कान्दे महापुराणे अवन्ती खण्डे केशवादित्य माहात्म्ये श्रीकेशवादित्य अष्टोत्तर शत नाम स्तोत्रं सम्पूर्णम् ॥**